अन्त में, मैं अक्षयवट प्रकाशन, इलाहाबाद के प्रकाशक महोदय को धन्यवाद देती हूँ जिनके सहयोग के बिना यह कार्य साकार रूप नहीं ग्रहण कर सकता था। अपना यह सारस्वत-कार्य सुधी-जनों के कर-कमलों में, मानवीय दौर्बल्य-जन्य अपनी त्रुटियों हेतु क्षमा याचना सहित समर्पित करती हूँ।

विदुषां वशंवदा
शैलजा पाण्डेय

'श्रीरुक्मिणीपत्रिका' के सात श्लोक

श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते
निर्विश्य कर्णविवरैर्हरतोङ्गतापम्!
रूपं दृशां दृशिमतामखिलार्थलाभं
त्वय्यच्युताविशति चित्तमपत्रपं मे।।१।।

का त्वा मुकुन्द महतीकुलशीलरूप
विद्यावयोद्रविणधामभिरात्मतुल्यम्।
धीरा पतिं कुलवती न वृणीत कन्या
काले नृसिंह नरलोकमनोऽभिरामम्।।२।।

तन्मे भवान् खलु वृतः पतिरङ्ग जाया-
मात्माऽर्पितश्च भवतोऽत्र विभो विधेहि।
मा वीरभागमभिमर्शतु चैद्य आराद्
गोमायुवन् मृगपतेर्बलिमम्बुजाक्ष।।३।।

पूर्तेष्टदत्तनियमव्रतदेवविप्र-
गुर्वर्चनादिभिरलं भगवान् परेशः।
आराधितो यदि गदाग्रज एत्य पाणिम्
गृह्णातु मे न दमघोषसुतादयोऽन्ये।।४।।


श्वोभाविनि त्वमजितोद्वहने विदर्भान्
गुप्तः समेत्य पृतनापतिभिः परीतः।
निर्मथ्य चैद्यमगधेन्द्रबलं प्रसह्य
मां राक्षसेन विधिनोद्वह वीर्यशुल्काम्।।५।।

अन्तःपुरान्तरचरीमनिहत्य बन्धूं-
स्त्वामुद्वहे कथमिति प्रवदाम्युपायम्।
पूर्वेद्युरस्ति महती कुलदेवियात्रा
यस्यां बहिर्नववधूर्गिरिजामुपेयात् ।।६।।

यस्याङ्घ्रिपङ्कजरजःस्नपनं महान्तो
वाञ्छन्त्युमापतिरिवात्मतमोपहत्यै।
यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं
जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात्।।७।।

(श्रीमद्भागवतपुराण श्लोक १०।५२।३७-४३ से गृहीत)

□□



श्रीगणेशाय नमः ॥ श्रीमज्जगन्मंगलनामधेयो दंध्याङ्घिरं नो वसुदेवसूनुः
यस्या दलग्रं मणिनूपुरादिलोको तरं सन्मुखवर्त्तमाप ॥१॥ प्रेषिता द्वारके
शाय रुक्मिण्या पत्रिका शुभा ॥ तद्यो लिख्यते किंचित्गुरुपादप्रसादतः ॥२॥
अथ भीष्मकराजो दुहिता रुक्मिणी नारदादिकग्रहीतनामधेयस्य भगवतो
वासुदेवस्य गुणान्संश्रुत्य तदनुरक्ता चित्ता तमेवाहर्निशमनुचिंतयाना ते
त्रिभ्रतिक्षणलवादिकालमपि युगशतायितमनुभवंती तदवाप्तौ कालवि
प्रकर्षमोढ्वा दुपारयंती पित्रादिभिरन्यत्र कृतविवाहनिश्चयेनातिशयित
धीरचित्ता स्ववृत्तभ्रवणोन्मथिकीदृशमित्यजानाना स्ववृत्तविज्ञापनगर्भि
कां पत्रिकामाप्तमब्राह्मणद्वारा प्राहिणोत् ॥ तं च भगवान्प्रतिहारैः प्रवे
शितं लेखवाहकं द्विजन्मानं संपूज्य तन्मुखतः एव पत्रिकामनुश्रृणोत् । यतो
हि राजा परप्रेषितं फलपत्रादिकिंचिदपि न प्रथमतः स्वयं स्पृशेद्वाचयेद्वेति
नीतिः । तत्रचादौ ब्राह्मणो लोके विवाहावसरं क्रियमाणसप्तपद्यां बध्यर्थ

।। श्रीरुक्मिणीपत्रिका ।।

(अज्ञातकर्तृकाटीकासंवलिता)

श्रीगणेशाय नमः

श्रीमज्जगन्मङ्गलनामधेयो दद्याद् गिरं नो वसुदेवसूनुः।
यत्पादलग्नं मणिनूपुरादि लोकोत्तरं सन् मुखरत्वमापः।।१।।
प्रेषिता द्वारकेशाय रुक्मिण्या पत्रिका शुभा।
तदर्थो लिख्यते किञ्चिद् गुरुपादप्रसादतः।।२।।

अथ भीष्मकराज्ञो दुहिता रुक्मिणी नारदादिसुगृहीतनामधेयस्य भगवतो वासुदेवस्य गुणान् संश्रुत्य तदनुरक्तचित्ता तमेवाहर्निशमनुचिन्तयाना तत्प्रभृतिक्षणलवादिकालमपि युगशतयितमनुभवन्ती तदवाप्तौ कालविप्रकर्षं मौग्ध्यादपारयन्ती पित्रादिभिरन्यत्र–कृतविवाहनिश्चयेनातिशयिता धी रचिता स्ववृत्तश्रवणेन मयि कीदृशमित्यजानाना स्ववृत्तं विज्ञाय नगर्भिकां पत्रिकामाप्ततमब्राह्मणद्वारा प्राहिणोत्। ततश्च भगवान् प्रतिहारैः प्रवेशितं लेखवाहकं द्विजन्मानं सम्पूज्य तन्मुखत एव पत्रिकामनुशृणोत्। यतो हि राजा परप्रेषितं फलपत्रादिकिञ्चिदपि न प्रथमतः स्वयं स्पृशेद् वाचयेच्चेति नीतिः।[1] तत्र चादौ ब्राह्मणो लोके विवाहावसरक्रियमाणसप्तपद्यां वधूरवयोरपरावृत्तिनिश्चय इवात्रापि। पद्यं शब्दो च वाक्ये च व्यवसायापदेशयोरितिकोशात् सप्तानामेव वाक्यानां निबन्धनेन सप्तपदीपर्याय–भूतेनावयोर्मिथोऽनुरागापरावृत्तिनिश्चयं सूचयति रुक्मिणीति। सप्तपद्यरचनाभिप्रायविशिदी–करणेनाह–श्रुत्वेति। सप्तानां वाक्यानां वसन्ततिलकावृत्तनिबन्धनव्याजेन वाक्यश्रवणसम–कालमेव पूर्णरसाविर्भावो भाव्य इत्यपि ध्वनितम्। एवं शब्दसन्दर्भरचनाभिप्रायमुक्त्वा तद्गतार्थनिबन्धनवैदग्धीनिपुणतामुपपादयति। अङ्गेति सम्बुद्धिबोधककाव्यं येन सम्बोध्यस्याव्ययत्वं बोधितम् स्युरप्याट्याङ्ग हे है भो इत्यनुशासनम्। अङ्ग अच्युत हे

---

१. आवेदयति यत्कार्यं शृणुयान्मन्त्रिभिः सह।–शुक्रनीति, १।३३०

अच्युत स्वाश्रितस्य न कदापि च्युतिर्यस्मादिति व्युत्पत्या भ्रात्रादिपरित्यागे न त्वामाश्रितवत्या मम न कदापि च्युति शङ्केति भगवन्तं बिरुदाभिधया सा बोधयति। मे चितम् अपत्रपं सत् त्वयि आविशतीति योजना। अपगता त्रपा लज्जा सङ्कोच इति यावत्। असङ्कोचेन प्रशस्त विधयेत्यर्थः। त्वयि अविशति प्रविशति लीयते त्वन्मात्रानुरक्तं जातमित्यर्थः। अतएव चित्तस्य काम्यानुरक्तत्वम् अन्यत्रापि दृष्टमिति नायकस्य नायिकायामनुरक्तस्य वाक्यम्–

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रसुप्तेव च वज्रलेपघटितेवान्तर्निखातेव च।
सा नश्चेतसि कीलितेव विखिशैश्चेतो भुवः
पञ्चभिश्च ता सन्ततितन्तुजालनिबिडं स्यूतेव लीनाप्रियेति[१] ।।२।।

एवमनुरागवशाच्चित्तं त्वदेकविषयमभूदिति भावः। ननु पित्रादिपरतन्त्राणां कन्यानां तदभिमतवरैकविषयोऽनुराग उत्तमस्तदन्यस्मिन् स्वातन्त्र्येणानुरागो शालीनतालीनताबाधक इत्याशङ्क्याह–शृण्वतां कर्णविवरैर्निविश्य तापंहरतस्ते गुणान् श्रुत्वेति क्रमः। हे भुवनसुन्दर त्रिलोकीसुन्दरेत्यर्थात्त्वदीयसौन्दर्यवार्तैव त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद् गोद्विज-द्रुममृगाः पुलकान्यविभ्रन्निति वचनानुसारेण शृण्वतां पश्वादीनामपि मनोहरणक्षमा किमुत पश्यतां जनानामिति परकीयमनोहरणशक्तिर्विलक्षणैव त्वत्सौन्दर्यस्येति भावः। श्रोत्रद्वारा श्रवणकर्तॄणामन्तः प्रविश्य तापमुद्वेगं हरतस्ते तव गुणान् शौर्यादीनानुकम्पित्वादीन्निशम्य श्रुत्वेत्यर्थः। श्रोत्रद्वारा यदीयसौन्दर्यरसप्लावितचित्तानां पुंसामपि सर्वतस्तापनिवृत्ति-पुरःसरमाप्यायनं भवति।

(प्रथमः श्लोकः)

श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते
निर्विश्य कर्णविवरैहरतोऽङ्गतापम्।

---

१. मालतीमाधव, ५।१०; दशरूपक, चतुर्थ प्रकाश में उद्धृत।

रूपं दृशां दृशिमतामखिलार्थलाभम्
त्वय्यच्युताविशति चित्तमपत्रपं मे।।[१]

हे भुवनसुन्दर, आपके गुणों को सुनकर, गुणों की वार्ता कान में प्रविष्ट होकर श्रोता के ताप को दूर करती है। आपका रूप देखकर नेत्रवानों को समग्र अर्थ का लाभ हो जाता है। हे अच्युत, मेरा चित्त लज्जा छोड़कर आप में प्रविष्ट हो रहा है। तात्पर्य यह है कि श्री रुक्मिणी जी का मन पूर्णतः भगवान् श्रीकृष्ण में प्रविष्ट हो गया है।

किं पुनर्युवतीनां कन्याजनस्येति भावः। लोकेप्यलौकिकवार्ताश्रवणेन तत्क्षणमुद्वेगनिवृत्तिर्भवतीति व्यवहारोऽनुसन्धेयः। हरत इत्यन्तेन विशेषणेन कदा मे भगवत्प्राप्तिः स्यादित्युद्वेगस्य तापकत्वात् तन्निरसनं भगवतःसुलभमिति द्योतितम्। तथा चातिचतुरेण भगवता स्वस्य गुणद्वारा परकीयमानसप्रवेशनप्रकार आचरितः। तदानीं यदा त्वद्गुणाः मच्चित्तं भगवत्परं कृत्वा कृतकृत्यत्वात् परावृत्ताः, स्वयं च तेजोमयोऽन्यत्र[२] चिरकालावस्था नानौचित्येन निवृत्तास्तदा मच्चित्तेनापि त्वदेकपरेण स्वस्थाने स्थातुमनीशेन तैर्गुणैः सह त्वय्यावेशेन समाचरितमिति। त्वन्मूलक एवानुरागस्त्वयि ममेति न शालीनत्वमिति ध्वनितम्। अनेन निर्विश्येति पादोपात्तभगवदन्वितप्रवेशतुल्य एवाविशतीति क्रियोपात्तप्रवेशश्चित्ते उपपन्न इति बोध्यम्। यद्वा त्वदीयगुणनिबद्धस्य ममचित्तस्यागन्तुकत्वेन त्वदधीनत्वमेवोचितमित्यावेदितम्। लोकेऽपि परगुणनिबद्धः स्वयमस्वतन्त्रस्त-दीयतामेवाङ्गीकरोतीति नीति जागर्तिः। अत्र कर्णादीनामवयवत्वेन विशिष्टवाचकत्वा-भावात्तत्साकांक्षितत्वेनोपस्थितस्यावयविनः शृण्वतामिति षष्ठ्यन्तेन प्रदर्शनान्न गजबृंहितवत्पुनरुक्तिः। एवमेव दृशां दृशिमतामित्यत्रोह्यम्। ननु गुणश्रवणमात्रेणैव सिद्धार्थपरित्यागपुरःसरमसिद्धार्थान्वेषणमसमञ्जसमिति चेदाह रूपमिति। दृशिमतां चक्षुष्मतां दृशां लोचनानामखिलार्थलाभमखिलार्थानां लाभो यस्मात् सर्वार्थप्रापकमित्यर्थः। रूपं श्रीः मूर्तिसौष्ठवं च श्रुत्वा नारदादिमुखत इत्यर्थः। अथवा दृशां दृशिमतां चेति कोटिद्वयम्।

---

१. श्रीमद्भागवत महापुराण १०।५२।३७

२. स्तेजोमयान्मच्चिताच्चक्षुः किरणदर्पणन्यायेन वापरावृत्ता भगवन्तं विहाया।–हस्तलेख की टिप्पणी में उल्लिखित अंश

तथा च तदेव यत्पश्यति तद्धि चक्षुरित्यन्वयेन वर्हायिते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये इति व्यतिकरेण च भगवन्मूर्तिसौन्दर्यावेक्षणमेव दृशां साफल्यकरकत्वेन सर्वार्थप्रापकं तद्वारैव दृशिमतामपि तथेत्यनुसन्धेयम्।

यद्वा, रूपं दृशामितिप्रयोगसामर्थ्याद् दृष्ट्वेत्यस्याध्याहारः। कुलवधूनां स्वाभिलषितकान्तचित्रदर्शनसमाचारस्य सुप्रसिद्धत्वादालेख्याभिप्रायेण दृष्ट्वेति योज्यम्। तथा च गुणश्रवणकाले श्रोत्ररूपकर्णेन्द्रियसन्निकर्षेण चित्तस्य त्वदधीनत्वमजनि, चक्षुःसन्निकर्षे सर्वार्थलाभोऽवश्यं कृत्यः, एवं सति नाद्यापि त्वप्राप्तिरित्याश्चर्यमिति द्योतितम्। एवं चालेख्यफलकानिरीक्षणमहिम्नैव सर्वार्थलाभस्योपस्थितत्वे सति साक्षाद्दर्शनेन मनोवचोगोचरफलावाप्तिरावश्यकीकृत्यसिद्धार्थभूतसाक्षाद्दर्शनायैव ममोद्योगः समञ्जसतर इति भावः। यथा वा स्वर्गादिसम्पच्छ्रवणमात्रेणैव यागादिप्रवृत्या तल्लाभस्य सुप्रसिद्धत्वात् तदर्थयाजकानामुद्योग ऐहिकधनादित्यागेनासिद्धार्थभूतस्वर्गादिविषय उपपद्यते। तद्विषये च यत्ने क्रियमाणे ईशोप्यनुकूलो भवतीति भावः। यतस्त्वत्सम्बद्धगुणाकृष्टस्य चित्तस्य त्वदेकपरत्वं सर्वज्ञेन त्वया ज्ञातुं शक्यत एवातः पित्रादित्यागपुरःसरं तवानुकूलायाः मम स्वीकारस्त्वयाच्युतेन विधेय इति निष्कर्षः। एतेन त्वत्प्रतिरूपफलकदर्शनत्वद्‌गुण-श्रवणाभ्यामाहितसंस्कारेण मनसानुचिन्तनकर्तुस्त्वदितरवस्तुजाताननुसन्धानपरायाः ममत्वप्राप्तिरवश्यं भवितव्येति ज्ञापकस्य दृष्टश्रुताभ्यां मनसानुचिन्तयन् प्रपद्यते। तत्किमपि ह्यपस्मृतिरिति शास्त्रस्य प्रामाण्यं त्वया शास्त्रयोनिना सम्पाद्यमित्यावेदितम्।

यद्वा, ननु सकृन्मयि त्वच्चित्तस्य प्रवेशेऽप्यनेकवासनाकुलतया ततो निर्गच्छेदित्या-शङ्क्याह अपत्रपमिति। पत्रं वाहनपक्षयो'रित्यनुशासनात् पत्राणि पक्षाः इतस्ततः सञ्चरणानुकूलाः वासनास्ताः पालयतीति पत्रपं तथा न भवतीत्यपत्रपम्। अस्थैर्यकारक-सर्वेतरवासनापरित्यागेन त्वय्येव चित्तं स्थैर्यमालम्बनेनातः परमन्यत्र गमिष्यतीत्यव्यभिचारिणी भक्तिर्बोधिता।

अथवा, अपत्रपं यथा स्यात् तथा अखिलार्थलाभरूपमिति योज्यम्। अर्थलाभस्तु क्वचित्पक्षपातेन क्वचिदेकदेशेन क्वचिद्विघ्नबाहुल्येन विच्छिद्य विच्छिद्य वा भवति।

---

१. अमरकोश, (नानार्थवर्ग), १८७

अपगता निवृत्ता त्रपा लज्जा सङ्कोचो यस्मिन् कर्मणीत्यपत्रपत्वस्य लाभेऽन्वये क्रियमाणे केनापि प्रकारेण सङ्कोचाभावोऽर्थलाभेऽभिहितः। तथा च सामस्त्येनापक्षपातेना-विघ्नेनाखिलार्थानां लाभरूपमिति बोध्यम्।

यद्वा, अस्मिन् पद्य उपालम्भोऽपि क्वचिदुपलभ्यते। तथा हि–

आदौ रक्ता भवेन्नारी पुमान् पश्चात्तदिङ्गितैः।[१]

–रितिशास्त्रे नायिकानुरागानन्तरं तदिङ्गितानुकूलो नायकानुरागो भवतीति ज्ञापितमस्ति। इह तु श्रीकृष्णेनैवादौ गुणद्वारा श्रवणकर्तॄणां मनसि प्रवेशः कृतः। ततो रुक्मिणीचित्तस्य भगवति प्रवेश इति श्रुत्वेति क्त्वा[२]प्रत्ययेनैव पूर्वापरीभावः इत्थं बोधितः।

तथा च रुक्मिण्याः, मम मनसा यदि कृष्णे त्वयि प्रवेशः प्रथमतोऽभविष्यत्तर्हि कन्याजनस्य पित्रादिपरतन्त्रत्वात् स्वातन्त्र्येण पत्रिकाप्रेषणादिदूषणं लज्जावहं च भवेत्। तथा तु नासीत्–

तस्माद् यद्यदाचरति श्चेद्य (श्रेष्ठ) स्तत्तदेवेतरो जनः।[३]

इति तदनुश्रुतमार्गेणैवाहमनुश्रितातो न ममैवंकरणेऽपि लज्जेति। गतत्रपमेव चित्तं त्वय्याविशति ज्ञेयम्। किञ्च, शृण्वतामन्तःकर्णविवरे प्रवश्यि तापं हर इत्यत्राप्युपालम्भो भवति। तथा हि लोके पश्यतोहरः विवरप्रवेशकारी रोचादिर्वा मूर्तसुवर्णादिहारी दृष्टः। त्वया तु शृण्वतोहरेण विवरप्रवेशकेन चामूर्तापहरणं कुर्वता मूर्तिमयाहरणवैदग्धी किमिति नाचरितेत्याशयः।

अथवा, भो अच्युत त्वदीयगुणश्रवणचित्रफलकदर्शनाभ्यां निमित्ताभ्यां ममापि मनोनुरागेणाविशति परन्तु अपत्रपं भवति। मां पित्रादिरन्यस्मै दास्यतीति भिया

---

१. तुलनीय–साहित्यदर्पण, तृतीयपरिच्छेद, पृ० ९५७
आदौ वाच्याः स्त्रियाः रागः पुंसः पश्चात्तदिङ्गितैः।

२. समानकर्तृकयोः पूर्वकाले–पाणिनीयसूत्र ३।४।२१

३. गीता ३।२१

स्वावस्थाविज्ञापनं करोमि। तथाप्युत्तरक्षण एवापगता प्राप्ता त्रपा लज्जा यस्य तथा भवतीत्यर्थं प्रकरणेन मुग्धात्वमावेदितम्। तथा च लक्षणम्–

प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धेति।।[१]

अथवा, मे चित्तं एतावदधीरं यत्तुभ्यं पत्रं प्रेषितं तदुत्तरपत्रपालनासहमित्यपत्रपपदेन बोधितम्। पत्रम् उत्तरपत्रं तद्रक्षति पालयति तदागमनपर्यन्तं स्थैर्यमालम्बते इति यावत्। तथा भवतीत्यपत्रपम्। एवं चैतावदधी रचितायां मयि त्वरया कृपा विधेयेति समस्तार्थकूतं वेदितव्यम्। अस्मिन् लोके चक्षुःश्रोत्रोभयेन्द्रियग्रहणं श्रुत्यापि संवादितं भवति। तथा च श्रुतिः–

अक्ष्णवन्तः कर्णवन्तः सखायः।[२]

इति। इतरेन्द्रियापेक्षया चक्षुःश्रोत्रयोर्विषयग्रहणे शक्तिरधिकेति तयोरेव ग्रहणम्।

न केवलं मुग्धस्य कन्याजनस्यैव त्वय्यभिलाषनिर्बन्धः किन्तु प्रगल्भस्यापि युवतिजनस्येत्याशयेनाह–कात्वेति। एतावन्निर्बन्धेन स्थितायाः प्रतिबन्धकवशेन त्वामप्राप्ताया मुक्तिं ददासीति वज्रंगतद्विजपत्नीवृत्तान्त[३]श्रवणवासनावासितमनस्का मुकुन्देति सम्बोधयति।

मुक्तिं ददासीति नैरुक्ताभिमतव्युत्पत्तिः। पाणिनीयमतेऽपि पृषोदरादित्वेन कथञ्चित् साधुत्वम्। हे नृसिंहेति प्रागल्भ्यं सूचयति। का महती त्वां न वृणीतेति योजना महती। प्रगल्भायाः परकीयायास्त्वदीयसौन्दर्यलोभतः त्वय्यनुरागो निःसीमतयोपलभ्यते। ननु प्रगल्भाया अपि युवत्याः विवेकवत्याः विरहेण प्रवृत्तिः। किं निदर्शनायेत्याशङ्क्याह–धीरेति। धियं विचारप्रधानां राति आदत्ते इति धीराः।

---

१. साहित्यदर्पण, तृतीय परिच्छेद ५८

२. ऋग्वेद १०।७१।७

३. श्रीमद्भागवतपुराण १०।२३ में वर्णित द्विजपत्नियों का वृत्तान्त।

(द्वितीय श्लोकः)

का त्वा मुकुन्द महती कुलरूपशील[1]
विद्यावयोद्रविणधामभिरात्मतुल्यम्।
धीरा पतिं कुलवती न वृणीत कन्या
काले नृसिंह नरलोकमनोभिरामम्।।[2]

हे मुकुन्द, आप कुल, रूप, शील, विद्या, अवस्था, धन एवं धाम में आत्मतुल्य अर्थात् अद्वितीय हैं। समग्र मनुष्यलोक के नेत्रों को आनन्द देने वाले नर श्रेष्ठ, विवाहकाल उपस्थित होनेपर कौन कुलीन एवं धीर कन्या पति रूप में आपका वरण नहीं करना चाहेगी? तात्पर्य यह है कि सभी कन्यायें आपसे विवाह करना चाहेंगी। अतः रुक्मिणी की श्रीकृष्ण से विवाह परक अभिलाषा सहज है।

एवं विवेकशालिन्या अपि प्रवृत्तिस्त्वत्प्राप्तावुपलभ्यते। तदा कन्याकाले नरलोकमनोभिरामं त्वां पतिं न वृणोतेति योजना। काले विवाहावसरे अनेन केवलं कन्यायाः मुग्धत्वात् तत्कर्तृकवरणस्य घुणाक्षरन्यायेनाकिञ्चित्करत्वाच्छङ्कितमपास्तम्। नरलोकमनोभिरामं यदीयलावण्यं नरलोकस्य सारासारविवेकवतोऽपि मनसः सर्वभावेन रामणीयकं सा रामणीयकनिधेरधिदेवता सौन्दर्यसारसमुदायनिकेतनं वेत्यनेक-प्रकारेणातिमनोज्ञत्वात् त्वां कन्याऽविवाहिता न वृणीत न वृणुयात्, अपितु वृणुयादेवेत्यर्थः। एवं कन्यया विचारपूर्वकं वृतेऽपि पित्रादीनामनादरः स्यादित्याशङ्क्य पित्राद्यभिमतं सर्वे सम्पच्छालित्वं भगवन्तो वर्णयति – कुलशीलविद्यावयोद्रविणधामभिरात्मतुल्यमिति।[3] लोके हि अनेकान्येकेषामभिमतानि भवन्ति–

---

१. कुलशीलरूप–श्रीमद्भागवतपुराण १०।५२।३८ में प्रकाशित पाठ।

२. श्रीमद्भागवत पुराण १०।५२।३८

३. तुलनीय–
आदौ कुलं परीक्षेत ततो विद्यां ततो वयः।
शीलं धनं ततो रूपं देशं पश्चाद् विवाहयेत्।।–शुक्रनीति ३।१७३, १७४
दृष्ट्वा धनं कुलं शीलं रूपं विद्या बलं वयः।
कन्यां दद्यादुत्तमं चेन्मैत्रीं कुर्यादथात्मनः।।–वही ३।१७१, १७२

कन्या वरयते रूपं माता वित्तं पिता श्रुतम्।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः।।[१] इति

एतेषामेकत्रसमावेशाभावेऽपि भगवति सर्वाणि समुचितानीत्याह–कुलेति। कुलं बान्धवाभिमतं शीलं विद्यां च पित्राभिमतं रूपं वयश्च कन्याभिमतम्। द्रविणं मात्राभिमतम्। धामप्रभावः सर्वाभिमतः। नन्वेते गुणाः अन्यत्राप्युपलभ्येरन्निति चेत् सामस्त्येना–नुपालम्भादित्याह–आत्मतुल्यम्। आत्मनैव तुल्यं निरुपममित्यर्थ;। नैतादृशानि कुलादीन्यन्यत्रसम्भवन्तीति भावः। अत्र–

उपमानोपमेयत्वं यदेकस्यैव वस्तुनः।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वय।।[२]

इति। इन्दुरिन्दुरिव श्रीमानित्युक्तेश्चन्द्रस्य श्रीमत्वेन नान्यः सदृशोऽस्तीति सदृशान्तरव्यवच्छेदो लभ्यते। ततश्च स्वेनापि सादृश्यासम्भवादनुपमेयत्वे पर्यवसानम्। ततो भगवतो न त्वयालङ्कारविधया सदृशान्तरव्यवच्छेदेनानुपमेयत्वं बोध्यम्। कुलादिभिरन्यैः साकमसाम्यमापादितुं कुलादिधामान्तगुणानां सत्याभिन्नवैषम्येन विन्यसनमूह्यम्। एवं विचारणया सर्व्वोत्तमे त्वयि वृत्ते न बान्धवादिव्यापकोपः स्यादित्याशयः। ननूत्तमकुलादिमता नायेकनानुरक्तापि कन्याकुलाद्यविज्ञाय कथं परिणयेति चेदाह–कुलवतीति। यद्यपि शीलादिभिर्न तौल्यं तथापि कुलतः किञ्चित् साम्यमित्यर्थः। एवं च नरलोकोऽपि त्वदीयसौन्दर्या–विष्टचित्तस्तव सन्निकर्षं स्पृह्यते, परकीयो युवतिजनश्च त्वामभ्यर्थयते। अतो मादृशकन्या–जनस्य विवाहकाले तव वरणोपेक्षणं सर्वथानुचितमिति भावः।

यद्वा, कुलादिर्युक्तमित्यध्याहारः। किञ्चेतरवरापेक्षया त्वयि महान् विशेष इत्याह–आत्मतुल्यमिति। अखण्डाद्वयानन्दनिरुपमैश्वर्येणात्मना तुल्यः। ऐच्छिकलीलाविग्रह–स्वीकरणेन ततो व्यवच्छिन्नस्येव दर्शनात्। सदृशः आत्मतुल्यस्तम्। तथा च विग्रहधारणे–ऽपीतरवत्कर्माधीनागमापायैश्वर्याभावेन तव सदा अच्युतैश्वर्यत्वादितरहेयतापुरःसरं

१. शुक्रनीति ३।१७४

२. चन्द्रालोक, पञ्चम मयूख १२

वरणीयत्वं सिध्यतीति भावः। अतएवैतदर्थप्रतिभासनाय नरलोकमनोभिराममिति विशेषणमुपन्यस्तम्। तथा हि व्रजस्यौरसपुत्रापेक्षया यशोदानन्दने श्रीकृष्ण गो-गोपी-गोपादीनां स्नेहाधिक्योपलम्भे-

ब्रह्मन् परोद्भवे कृष्णे इयान् प्रेमा कथं भवेद्।[१]

इति राजप्रश्नः। उत्तरं भगवानाह श्रीशुकः पुत्रदेहाद्यपेक्षया।

तस्मात् प्रियतमः स्वात्मा सर्वेषामपि देहिनाम्।
तदर्थमेव सकलं जगदेतच्चराचरम्।[२]
तद् राजेन्द्र यथा स्नेहः स्वस्वकात्मनि देहिनाम्।
न तथा ममतालम्बि पुत्रवित्तगृहादि च।।[३]

इत्युक्तम्। अन्ते-

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्।[४]

इत्याद्युक्तम्। तथा च पुत्रादीनामात्मशेषत्वेन प्रेमास्पदतया आत्मनि परप्रेमास्पदत्वस्य सर्वानुभवसिद्धत्वादात्मन एव श्रीकृष्णरूपेणावतीर्णत्वाद् गो-गोपी-गोपीदीनां यशोदाकिशोरे प्रेमाधिक्यस्य सूपपन्नत्वम्। प्रकृतेऽपि नरलोकस्यापि परमप्रेमास्पदत्वेन अभितः सर्वकाले देशे च रामं मनोज्ञम्। तदा युवतिजनस्याभिराममिति कैमुत्यं ज्ञेयम्। एतदभिप्रायेणैव भगवता बादरायणेनास्मिन् पद्ये 'त्वामिति साक्षात् द्वितीया'[५]-मनुक्त्वा आदेशेनैव द्वितीया भगवद्विशेषणत्वेन विन्यस्ताकार्योपयोगित्वेनैव श्रीकृष्णस्य सद्वितीयत्वं वस्तुतोऽद्वितीयत्वमिति श्लेषविधया प्रदर्शितमिति।।२।।

---

१. श्रीमद्भागवतमहापुराण १०।१४।४९
२. वही १०।१४।५४
३. वही १०।१४।५१, प्रकाशित पाठ-गृहादिषु
४. वही १०।१४।५५
५. 'त्वामौ द्वितीयायाः'।-पाणिनीयसूत्र ८।१।२३

नन्वेवं सत्यपि तव निश्चये मम नियमः परिणयन् यत्रास्तीति चेत् व्रियतां नामान्या त्वया। परन्तु मदनुस्मरणसाफल्याय लोकोपहास्यत्वनिरसनाय चैवमनुष्ठेयमित्याशयेन विज्ञापयति – तन्मे इति। भवानिति प्रथमपुरुषनिर्देशेन श्रीकृष्णस्य प्रथमवरत्वं ध्वनितम्। नान्यत्र वाद्यापि निश्चय इति भावः। तत् तस्मात् कुलीनत्वसाम्यादित्यर्थः। खलु अवधारणे। भवानेवेत्यन्ययोगव्यवच्छेदः पतिर्वृतो मयेत्यन्वयः। ननु भ्रात्रादिभीतायास्तव पालनं करिष्यामीति तत्राह–आत्मा देहोर्पितश्च।

(तृतीयः श्लोकः)

तन्मे भवान् खलु वृत्तः पतिरङ्गजाया-
मात्मार्पितश्च भवतोऽत्र विभो विधेहि।
मा वीरभागमभिमर्शतु चैद्य आराद्
गोमायुवन् मृगपतेर्बलिम्बुजाक्ष।।३।।[1]

हे श्रीकृष्ण, मैंने आपका वरण पति के रूप में कर लिया है और अपने आपको आपके प्रति समर्पित कर चुकी हूँ। आप यहाँ आकर मुझे अपनी पत्नी के रूप में स्वीकार कीजिये। हे कमलनयन, आप जैसे वीर का भाग बन चुकी मुझे शिशुपाल आदि राजा उसी प्रकार स्पर्श न करें जैसे सिंह के भोज्य भाग को सियार नहीं छू सकता। तात्पर्य यह है कि रुक्मिणी से भगवान् श्रीकृष्ण के अतिरिक्त कोई अन्य विवाह न कर सके।

तेनेतः परं मम देहे तवैव सत्तेति द्योतितम्, अत्रोऽत्रागत्येत्यध्याहारः। मां जायां विधेहि। जायामित्यनेनापत्यजननयोग्यता सूचिता। भो विभो समर्थेति सम्बुद्ध्या सर्वसामर्थ्यवतस्तव दूरदेशविप्रकृष्टयापि मया विवाहस्तु सम्पाद्य इति ज्ञापितम्। नन्वन्यः कुलशीलादिमांस्त्वां परिणयतु, त्वयापि त्वदनुकूलाया भाव्यमित्याशङ्क्यैवं कृते लोकोपहास्यता स्यादित्याह – मा वीरेति। चैद्यः आरात् साक्षात् वीरभागं मां मा अभिमर्शतु, स्पृशतु। अमानानाः प्रतिषेधे अन्यस्य कुलशीलादिमन्तोऽपि मम स्पर्शे

---

१. श्रीमद्भागवत महापुराण १०।५२।३९

अधिकारो नास्तीत्यर्थः। ननु परिणयतां नामान्यः कास्माकं क्षतिरिरिति चेत्, सर्वथाऽश्लाघ्यमित्याह। मृगपतेः सिंहस्य बलिं भागं गोमायुवत्, यथा कदाचित् सिंहभागमामिषं यदि गोमायुः स्पृशेत् तदा द्रष्टारोप्यं समञ्जसं मन्वाना गोमायुं निवारयन्ति। तथा मां वीरस्य तव भागं तां गोमायुतुल्यैश्चैद्यो यथा न स्पृशेत् तथा विधेयमिति भावः। त्वदुपेक्षणे सति निरुक्ते दृष्टां तेनोपहास्यता स्यादित्यर्थः। ननु वीरभागमित्यनेन वीर्यैकसमाधिगम्यायास्तव स्वीकारे कठोरत्वं क्रौर्यं चोपलभ्यते ममेति चेदाह–अम्बुजाक्षेति। अम्बुजे इव कमले इवाक्षे नयने यस्येत्युक्त्वा सौष्ठवातिशयः सरसता द्योतिता। सुहृद्भावश्च बोधितः। एवं च वीराणां क्रौर्यादिकं युद्धादिकाले एवं शत्रूणां भयदर्शनार्थम्। न सर्वदेत्याशयः। अतएवैकस्मिन्नेव पुरुषे प्रतिपतृबुद्धिभेदेनानेकधोल्लेखनम्। 'मल्लानाम-शनिर्नृणां नरवर'[१] इत्यादौ बहुभिर्बहुधोल्लेखादेकस्योल्लेखालङ्कारविधयोपपद्यत'[२] इति। यद्वा, त्वं मां जायां कुर्विति क्रियाध्याहारेण योज्यम्।

ननु त्वद् भागधेयेनाहमेव पतिः कल्पित इति कुतो निश्चयत इति चेदाह। हे विधे दैवरूपमद्भागधेयमेव त्वद्रूपेण परिणतमिति। त्वद्विषये न दैवान्तरापेक्षास्तीति भाव;। हि एवार्थः। कुर्वेवेत्यत्र लाप्यः। ननु दैवरूपोऽहं यदि तर्हि कालान्तरे परिणेष्यामि। किमित्यधुनैवाधीरा भवसीत्याशङ्क्य चैद्यकृताभिमर्शनादिविडम्बनापि मा भूयादित्याशयेनाह–मा वीरेति। पदयोजना तु समानैव। दैवेन चैद्यस्य वरतयोपकल्पितत्वेऽपि तत्कृताभिमर्श-जायमानाशुचित्वसम्भावनया पुण्यफलीभूतत्वदागमनकालविप्रकृष्टमन्तरितं स्यादिति भिया अभिमर्शनप्राक्तनकाल एवागन्तव्यमिति विज्ञापनाभिप्रायाधीरात्व–परिहारोभ्युपेयः।।३।। ननु पूर्वश्लोके आत्मतुल्यमिति।

(चतुर्थः श्लोकः)

पूर्तेष्टदत्तनियमव्रतदेवविप्र-
गुर्वर्चनादिभिरलं भगवान् परेशः।

---

१. श्रीमद्भागवत० १०।४३।१७

२. चन्द्रालोक, पञ्चम मयूख, २३

आराधितो यदि गदाग्रज! एत्य पाणिम्
गृह्णातु मे न दमघोषसुतादयोऽन्ये।।४।।[१]

हे गदाग्रज श्रीकृष्ण, यदि मैंने पूर्व जन्मों में पूर्त एवं इष्ट कर्म किया हो, दान, नियम, व्रत, देवों, ब्राह्मणों एवं गुरुजनों की पूजा की हो तो हे भगवान् परमेश्वर, आप आकर मेरा पाणिग्रहण करें, न कि शिशुपाल आदि अन्य राजा मुझसे विवाह करें अर्थात् रुक्मिणी से भगवान् श्रीकृष्ण ही विवाह करें।

विशेषणेन मयि परप्रेमास्पदाभूतात्मरूपत्वसमर्थने सति तदवाप्तिर्नैहिके तावन्मात्रेणानुयनयेन स्यादित्याशङ्क्य विविदिषति '**यजेन दानेन तपसाऽनाशकेनैति**'[२] श्रुत्या, '**अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति**'[३] स्मृत्या च प्राचीनजन्माचरित-पुण्यवशेन त्वत्प्राप्तिः स्यादित्याह–पूर्तेति। न च भवान्तरीयपुण्यास्तित्वे किं मानमिति शङ्क्यम्। अप्रौढवयस्यपि अतिमात्रानुरागवशेन तत्सद्भावस्यार्थपत्या निश्चितत्वात्। पूर्तादिभिर्भगवानलमाराधितो यदि यर्हि तर्हि एत्य पाणिं गृह्णात्विति क्रमः। भगवतः सर्वभावेन यद्याराधनं भवेत्तदा त्वदागमनादिघटेतेत्यभिप्रायेणाह। पूर्तेत्यारभ्य आदिभिरलं भगवानिति। भगवान् समस्तैश्वर्यधर्मयशःश्रीज्ञानवैराग्याख्यसद्गुणसम्पन्नं योज्यम्।[४]

---

१. श्रीमद्भागवतमहापुराण १०।५२।४०
२. बृहदारण्यकोपनिषद् ४।४।२२
३. भगवद्गीता ६।४९
४. (क) ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः इति पुरा.... अध्यवसाया बुद्धिर्धर्म्मोज्ञानं विराग ऐश्वर्यम्।–सांख्यकारिका।–बार्हस्पत्यम् भाग २, पृ० १५४९
(ख) ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेत्युक्तम्।–विष्णुपुराण ६।५।७४, वही, भाग ६, पृ० ४६३२ में भागवत् शब्द
(ग) ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः।।–विष्णुपुराण ६।५।७९

तथा हि पूर्तं कूपाः आरामतटाकादि। तच्चोपनयनात् प्रागापि कर्तुं शक्यते। अत इष्टात् पूर्वोपादानम्। एतस्य चिरकालावस्थायित्वेन कर्तुर्यशोविवर्धकत्वम्। तेन यशोनिधिरीशः आराधितः। यो यत्स्वभावः तत्स्वभावेन हि तदनुसरणं तत्परितोषाय भवतीति लोकनीतिः। इष्टम् अग्निहोत्रादिकेवलापूर्वजनकत्वे वेदबोधितत्वाद्धर्मः। तेन धर्मनिधिः। दत्तेन हिरण्यादिना तेनैश्वर्यनिधि परितोषितः। नियमस्तीर्थाटनादिः। तत्र च श्रीसमुपयोगद्वारा श्रीनिधिः पूजितः। व्रतं कृच्छचान्द्रायणादितेन वैराग्यकारकेण वैराग्यनिधिः सत्कृतः। देवब्राह्मण–गुर्वर्चनेन–

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिताः ह्यर्थाः प्रकाशन्ते महात्मनः।।[१]

इति श्रुत्युक्तेन ज्ञानप्रदेन ज्ञाननिधिः प्रसादितः। एवं षड्भिरूपायैः यद् भगवदाराधनं तदेवालमत्यन्तमाराधनं भवेदित्यर्थः। आदिशब्देन ध्यानधारणादिपरिग्रहः। तेन च परेशः आराधितः। परश्चासौ ईशश्चेति विग्रहः। अन्यत्र ऐश्वर्यादिः कर्मप्रापितत्वेन तुच्छत्वादीश–शब्दव्यवहारस्यापि तथात्वात्, भगवति तु नित्यैश्वर्यादिमत्वेन परेशत्वं सिद्ध्यतीति भावः। तथा च यः परमात्मा अप्रच्युतैश्वर्यः सर्वज्ञ आराधितस्तस्यैव सम्प्रति त्वद्रूपेणा–वतीर्णत्वान्मदीयनिरुक्ताराधनसाद्गुण्याय त्वयागत्य पाणिग्रहणरूपफलवितरणं कार्यमित्याशयः। अतो जन्मान्तरीयपुण्यवशेनैव त्वत्प्राप्तिर्भवति। ऐहिकमनुनयादि तु स्मारकं भवेदित्यूह्यम्। स्वस्य प्राग्भवीयस्मरणाभावेन यदीति सन्देहवचनं यथाराधकेनैवा–राध्यस्यानुसरणं कार्यमिति न्यायप्राप्तत्वात् त्वयागत्येति वचोऽश्लाघ्यमिति। तथापि यत्राराधकस्तपस्यादिशीलो निवसति, तत्रैव भगवतो समागमनाद्युपलभ्यते ध्रुवादौ। तेन न्यायेनात्रापि भगवतैवागत्य मुग्धायाः मनोरथः पूरणीय इत्यावेदितम्। ननु परेश एवात्मा यदि निरुक्तव्रतादिभिराराधितस्तदा स्वाप्तिरूपफलदानं करिष्यतीत्याशङ्क्यात्म–समर्पणरूपपरमफलापेक्षया लीलाविग्रहसम्बद्धपाणिग्रहणरूपपरिच्छिन्नफलावाप्तिरपि पर्याप्ता ममेत्याशासन्ती प्राह–पाणिं गृह्णात्विति। अलं पर्याप्तमित्यत्र वा अलं इति योज्यम्। एतावतैव मम कृतकृत्येति भावः। अतएव हि अभियुक्ताः परमफलमनाशास्य परिच्छिन्न–फलमेव प्रार्थयन्ते। न योगसिद्धीरपुनर्भवं वा वाञ्छन्तीति पद्ये पाणिग्रहणपदप्रयोगादितः

१. श्वेताश्वतरोपनिषद् ६।२३

परं गार्हस्थ्यधर्मप्रवृत्तिः स्यादिति बोधितम्। ननु पाणिग्रहणार्थमेवागन्तव्यमित्यत्र प्राथमिकपाणिग्रहणाङ्गस्वस्तिवाचनादौ प्रथमवरस्यास्वातन्त्र्यात् तदर्थमेकाकिनो ममागमनं भवेदित्याशङ्क्याह–गदाग्रज इति। गद अग्रजो यस्येति सः। तस्याग्रजत्वेन पितृस्थानीयत्वात् स्वस्तिवाचनादावुपयोक्ष्यति स इति भावः। नन्वैश्वर्यशालिनश्चैद्यादयस्त्वामभ्यर्थयन्ते, त एव पाणिं गृह्णन्त्वितित्यत आह–न दमघोषसुतादयोऽन्ये इति। दमघोषसुतः शिशुपालः। आदिशब्देन जरासन्धादयः। अन्ये अपरे। परेश एव वरो यदा मम तदा शिशुपालादय अपरे अपरा एवेति, पर्यायोक्तं तु गम्यस्य वचोभङ्ग्यान्तराश्रयमिति पर्यायोक्तालङ्कारविधेयेत्थं अर्थ उन्नेयः।

चैद्यस्यैश्वर्यशालित्वं पुण्यैकदेशप्राप्तत्वेन तुच्छतरमित्याह दमघोषसुत इति। दमस्येन्द्रियनिग्रहस्य घोषः प्रख्यातिः यस्येति सः। इन्द्रियनिग्रहैकसामग्रिसम्पादितैश्वर्यस्य दमघोषराज्ञः सुते शिशुपाले तस्य व्यवहित्वेन तुच्छैश्वर्यत्वात् तत्कृतपाणिग्रहणं सर्वथानुचिततममिति भावः। एवं च सर्वज्ञत्वादिगुणसम्पन्नेन भवता प्राग्भवीयपुण्यसामग्र्या ऐहिकानुनयसामग्र्या च सम्पन्नेन भूत्वा ममेष्टलाभः सम्पाद्य इति फलितम्।।४।।

ननु त्वदीयमनोरथपूरणं त्वत्पुण्यपरिपाकदशायां करिष्यामीत्याशङ्क्य चैद्येन साकं मद्विवाहस्य पित्रादिभिरितः प्रभृतिः द्वित्रिदिनमध्ये निश्चित्य तदाह्वानस्य कृतत्वात् तत्कृतमदभिमर्शनस्य क्रमप्राप्तत्वे सति तदघटनार्थं भवत्सन्निधानस्य मत्प्रार्थनावशतोऽवश्यं जायमानत्वेन तत्समय एव मत्पाणिग्रहणरूपानुग्रहस्योपस्थितस्योपस्थितत्वादनया प्राणाल्पपुण्यपरिपाककालस्य सन्निकृष्टत्वमनुमीयते। श्लोकः–

(पञ्चमः श्लोकः)

श्वोभाविनि त्वमजितोद्वहने विदर्भान्
गुप्तः समेत्य पृतनापतिभिः परीतः।
निर्मथ्य चैद्यमगधेशबलं[१] प्रसह्य
मां राक्षसेन विधिनोद्वह वीर्यशुल्काम्।।५।।[२]

---

१. मगधेन्द्रबलं।–प्रकाशित पाठ

२. श्रीमद्भागवतपुराण १०।५२।४१

हे अजेय श्रीकृष्ण, आप मेरे विवाह से एक दिन पूर्व ही गुप्त रूप से अपने सेनापतियों के साथ हमारे विदर्भ राज्य आ जाइये। पुनः शिशुपाल एवं जरासन्ध को उनके सैन्य बल सहित मारकर बलपूर्वक राक्षस विवाह विधि से मेरे साथ विवाह कीजिये। इस प्रकार आप अपने पराक्रम को ही मेरे मूल्य के रूप प्रदान करेंगे, अतः मैं वीर्यशुल्का होऊँगी। तात्पर्य यह है कि रुक्मिणी भगवान् श्रीकृष्ण को राक्षस विधि से अपने साथ विवाह के लिये प्रेरित करती हैं। इससे भगवान् श्रीकृष्ण का पराक्रम शत्रुओं पर स्थापित होगा एवं लोक में उनकी यशोवृद्धि होगी।

इत्याशयेनाह–श्वोभावीति। यद्वा ननु कन्यागृहे समागत्य पाणिग्रहणस्य ब्राह्मविषयत्वेन[1] क्षत्रियाणां स्ववीर्यमप्रदर्श्य तथाकरणमनुचितमित्याशङ्क्य वीर्यप्रदर्शनपुरस्कारेण राक्षसविवाहस्य[2] कर्तव्यतां विज्ञापयन्ती तदर्थं पूर्वमन्त्रामाह–श्वोभाविनीति। भो अजित, न केनापि जित, प्रकाशेनागमने पित्रादयो मां चैद्याय प्रेषयेयुरविधाने न वा दद्युः, स्वगृहे गोपयेयुरेवं सति मदनुग्रहो व्यवहितः स्यादित्यभिप्रायेणाह–गुप्त इति। गुप्तरूपेणागमने नोक्तदोषसम्भावनेति भावः। अजित्वेऽपि नैकाकिना राज्ञा गुप्तेनापि गन्तव्यमित्याह–पृतनापतिभिः परीतः इति। पृतना सेना।[3] कोलाहलत्वेन गुप्तं ह्यवस्थानं सेनायाः न सम्भवेत् अतस्तत्पतिभिरित्यर्थः। ननु तत्पतयोऽपि दश पञ्च चेदानीतास्तदा शत्रुसेनासमुदाये किं करिष्यन्तीति चेन्न। ये हि सेनापतयस्ते हि महारथिनोऽतिरथिनो भवन्ति। तत्स्वरूपं चोक्तम्–

एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्।
शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते।।[4]

---

१. आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम्।
आहूय दानं कन्यायाः ब्राह्मो धर्मः प्रकीर्तितः।।–मनुस्मृति ३।२७

२. (क) राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः।–मनुस्मृति ३।२४
(ख) हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते।।–मनुस्मृति ३।३४

३. सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः।–अमरकोषः २।८१

४. वाचस्पत्यम्, भाग ६, पृ० ४७४३

एतदपेक्षया दशगुणाधिकः अतिरथः। तस्मादेते दश पञ्चापि अनेकाक्षौहिणीपराजये दक्षाः भवेयुरिति भावः। यद्वा, सेनास्तु विजातीयाः नानादेशीयाश्च भवन्ति। तत्पतयस्तु स्वीयाः एव विश्वस्ताःकल्प्यन्ते। तथा च तैः सहागमने न कदापि मन्त्रभेदः स्यादिति भावः।

अत एवात्र समेत्येत्युपपादनात् पूर्वश्लोके एकस्यैवागमनविवक्षयेत्युक्तम्। परीतः परिसमन्तादष्टदिक्षु इत अनुगत इत्यर्थः। अनेनैकाकिनो राज्ञो गमनत्वं व्यावर्तितम्। ननु पृतनापतिभिःसहागमने गुप्तत्वं न घटेतेति चेत् स्वाप्तिवास्तव्यदेशस्य गोपनयोग्यतां श्लेषविधया दर्शयन्ती स्वदेशाभिधानमाह–विदर्भानिति विशिष्टाः बहुलाः दर्भास्तृणानि येष्विति तृणबहुलदेशेषु ससैन्यस्यापि राज्ञो गोपनं सुकरमित्र्थः। अवान्तरदेशविवक्षया स्वागतावान्तरभेदकल्पनया वा बहुवचनम्। गुप्तत्वेनागमनमपि एकरात्रिव्यवधानेनैव भाव्यमित्याशयेनाह–श्वोभाविनीति। उद्वहने विवाहे सति। आगत्य किं कर्त्तव्यमित्यत आह–निर्मथ्येनेति। चैद्यमगधेशबलं शिशुपालजरासन्धयोर्बलं निर्मथ्य विनाश्य पुनरपि तेषामभ्युत्थानं माभूदित्येतदर्थं प्रसह्येति। हठेनेत्यर्थः। मां उद्वह परिणय वरयेति यावत्। ननु परकीयकन्याहरणं परस्वादान्नतयाऽस्माकमश्लाघ्यं स्यादिति तत्राह–वीर्यशुल्कामिति। वीर्यं पराक्रमः शुल्कं मूल्यत्वेन देयमस्ति यस्यास्ताम्। न हि मूल्यवितरणं कृत्वा हरणं परस्वादाने भवेत्। अतः पराक्रमदर्शनबलं राक्षसेन विधिना निर्मथ्येति योज्यम्। राक्षसेनविधिनेत्येकं पदं वा। राक्षसानामिनः पूज्यो विधिः प्रकारः तेन। एवं विपक्षबलं निर्मथनीयं, राक्षसा अपि यं निमर्थनप्रकारं श्रुत्वा श्लाघयेयुः। यद्वा, राक्षसेन विधिनेति गुप्त इत्यनेन योज्यम्। राक्षसेन विधिना तिरस्करिणीविद्याप्रभावेन पृतनापतिसमेतस्य स्वस्य गोपनं विधेयमिति भावः। यद्वा, अजितोद्वहने इत्येकं पदम्। अजितायाः ममोद्वहनं, तस्मिन् शिशुपालो हि स्ववीर्याप्रदर्शनेन प्रतिषिध्यति। एवं च त्वया ससैन्येनागत्य विपक्षान् पराजित्य स्ववीर्यं च प्रदर्श्य मम स्वीकरणस्य प्राचीनपुण्यपरिपाकफलत्वादनेन तीर्थेन परिपाककालस्यातिसन्निहितत्वमनुमितमिति ध्वनितम्। यद्वा अनेन मन्त्रेणागमनादौ क्रियमाणे राक्षसोद्वाहविधे सिद्धत्वान्न ब्राह्मणविवाहविषयत्वमिति सूचितम्।।५।।

ननु चैद्यादीनां निर्मथने क्रियमाणे यदि त्वं भ्रात्राभिर्गोपायिता, तदा तद्बन्धूनाममथने

कृते त्वदलाभान्मथने वा कृते त्वदीयकुलस्य विप्लवप्रसङ्गात् सर्वोप्यस्माकं प्रयासोऽपकीर्तिकरः स्यादित्याशङ्क्य स्वकुलाचारप्राप्तविवाहवधूबहिर्निंगमन-विधेरवश्यक्लृप्तत्वात् तत्समये मद्वरणं विधेयं नान्यदिति सूचयन्ती प्राह। श्लोकः–

(षष्ठः श्लोकः)

अन्तः पुरान्तरचरीमनिहत्य बन्धूं-
स्त्वामुद्वहे कथमिति प्रवदाम्युपायम्।
पूर्वेद्युरस्ति महती कुलदेवियात्रा
यस्यां बहिर्नववधूर्गिरिजामुपेयात्।।६।।[१]

हे श्रीकृष्ण, आपको मुझसे विवाह करने के लिये अन्तःपुर में प्रवेशकर मेरे भाई–बन्धुओं को मारना नहीं होगा। यह कैसे होगा, इसका उपाय यह है कि विवाह से एक दिन पूर्व विवाह वाली कन्या की एक कुलदेवी पूजन की यात्रा होती है। इसमें नववधू बाहर निकल कर गिरिजा मन्दिर जाती है। यहाँ रुक्मिणी भगवान् द्वारा अपने अपहरण का उचित अवसर संकेतित करती हैं।

अन्तःपुरेति। प्रायो निकटव्याख्यायां नगराद् बहिः स्थितां गिरिजां शर्वाणीम्। यद्वा, बहिर्गिरिजामित्येकं पदम्। 'छन्दसि', 'व्यवहिताश्चेति'[२] पाणिनीयानुशासनान्नववधू-पदव्यवधानेऽप्यदोषः। यद्यपि अन्तःपुरगताया मम हरणे अनेके प्रकाराः सन्ति। भगवतैव वेषान्तरं कृत्वान्तःपुरे समागत्य हरणं कार्यम्। अथवा तिरस्करिणीविद्यावशेनान्तःपुरप्रवेशनम्। आकर्षणविद्यया मद्धरणम्। पित्रादीनां बुद्धिप्रेरणम्। तथाप्येते प्रकारा वीर्यप्रदशनेन भवन्तीति। अतस्तान् विहाय मम बहिरागमनमवश्यम्भावीत्येष एव प्रकारोऽभ्युपेय इत्यभिप्रायः। महती। नगराद्यत्किञ्चिद्दूरगमनरूपा, एतेन मध्ये एव अवसरे लाभः स्यादिति बोधितम्।।६।।

ननु निष्किञ्चनत्वनिष्किञ्चनजनप्रियत्वादिलोकोपहास्यधर्मवत्वेनास्मान् विहाय

---

१. श्रीमद्भागवत महापुराण १०।५२।४२

२. अष्टाध्यायी १।४।८०, १।४।८२

प्रख्यातसद्गुणवान् वरणीयोऽन्यस्त्वयेत्याशङ्क्य विचक्षणैकसम्प्रार्थ्यपरमैश्वर्यं भगवतो द्योतयन्ती अर्थात् तदितरैश्वर्यादिरा-पातिकदृष्टिश्लाघ्यत्वमाह – यस्येति। श्लोक–

(सप्तमः श्लोकः)

यस्याङ्घ्रिपङ्कजरजःस्नपनं महान्तो
वाञ्छन्त्युमापतिरिवामत्मतमोपहत्यै।
यर्ह्यम्बुजाक्ष न लभेद भवत्प्रसादं
जह्यामसून् व्रतकृशाञ्छतजन्मभिः स्यात्।।७।।[1]

हे कमलनयन, उमापति महादेव जैसे देवता भी अपने तम के विनाश के लिये आपके चरणरज को चाहते हैं। यदि मैं वह चरण–रज प्राप्त न कर सकी तो मैं व्रतादि के अनुष्ठान से अपने आपको सुखाकर अपने प्राण त्याग दूँगी, चाहे आपकी कृपा-प्राप्ति के लिय मुझे सैकड़ों जन्म लेना पड़े। तात्पर्य यह है कि रुक्मिणी भगवान् श्रीकृष्ण को प्राप्त न करने की स्थिति में प्राण–परित्याग का निश्चय करती हैं।

महान्तः सारासारनिपुणाः श्रीशुकप्रभृतयः सूक्ष्मदृष्टयः आत्मनः स्वस्य यत्तमो मालिन्यं तस्योपहत्यै विनाशाय यस्य ते पदपङ्कजरजोभिः स्नानं तत्संसर्गमिति यावत्। वाञ्छन्ति केवलं नाद्यापि प्रापुरित्यर्थः। पङ्कजाद्रजः प्रवृत्तेः सुलभत्वेऽपि सूक्ष्मदृष्टीनामपि तेषां तत्प्राप्तिर्दुर्लभतरेतिभावः। न केवलं महतामेवाप्राप्तिः किन्तु सर्वैश्वर्यशालिनोऽपीत्याह – उमापतिरिवेति। उमा दाक्षायणी तस्याः पतिर्मृडः, तथा च दक्षकन्या तत्पतिर्मृडश्च तदङ्घ्रिरजोगवेषणं कुर्वाणावपि न प्रापतुरित्यर्थः। यदङ्घ्रिरजो लेश एव क्वचित् प्राप्तः, तेन शिवस्य विभूतिरभवदिति उन्नेयम्। ननु ऐश्वर्यसम्पन्नेन उमापतिना किमिति रजः प्रार्थ्यते इति चेदाह – आत्मतमोहत्यै इति। अत्रापि चेति। यद्यपि कर्पूरगौरत्वादिना आपाततस्तमो लेशोऽपि नास्तीति दृश्यते, तथाप्यात्मगततमोनिवृत्तिस्तु नास्ति, अतस्तन्निरासाय रजो वाञ्छतीत्युक्तम्। रजस्तमसः उपमर्दकमिति[2] सुप्रसिद्धमेव। शिवादौ सात्त्विकोपलम्भतेति

---

१. श्रीमद्भागवत महापुराण १०।५२।४३

२. रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा।।–श्रीमद्भगवद्गीता १४।१०

तदाचारपर्यालोचनया किञ्चित् सतमस्कत्वे भानवदन्यदीयैश्वर्यादिरापातदृष्टिरमणीयत्वेन मूर्खप्रतारणामात्रफलत्वात्, तात्त्विकसर्वैश्वर्यनिधानं त्वमेवासीति तात्पर्यम्। यतः शिवाद्याः महान्तोऽपि यदङ्घ्रिरजः प्रार्थयन्ते, तदा श्लेषविधया स्त्रीजनस्य तदभ्यर्थनमुचितमेवेति हास्यरसोऽभिव्यञ्जितो भवतीत्यूहम्। नन्वद्यापि शिवादीनां महतामपि यदवयवसम्बद्धरजः-आदेरपि अप्राप्तिस्तदा कन्याजनस्य तु सर्वथा साक्षात् भवगतः प्राप्तिर्दुलभतरेत्याशङ्क्याह-यर्हीति। यर्हि यदा भवत्प्रसादं न लभेयं तदा व्रतकृशानसून् जह्यामीत्यन्वयः। व्रतैरुपवासादिभिः कृशान् सूक्ष्मान् केवलं जलपानेन यथाकथञ्चित् स्वस्वस्थानमात्र-स्थायिनः इतस्ततः सञ्चारशून्यनसून् प्राणादिवायून् अन्नादिपरित्यागेन प्रायः सर्वेन्द्रियाणि मनःआदीनि लीनानि। **'अन्नमयं हि सोम्य मन'**[१] इति श्रुतेः। **'आपोमयः प्राणः'**[२] इति श्रुतेः। अवशिष्टान् प्राणांस्तुभ्यं जह्यां त्यजेयम्। त्यागश्चात्र समर्पणरूपः। एतावत्पर्यन्तं मत्प्राणधारणं तत् त्वत्प्राप्त्याशया। यदि भवतः प्रसादं न प्राप्नुयां तर्हि गतप्रायान् प्राणान् समर्पयिष्ये इति भावः।[३] ननु इह भवे भवान्तरं प्रसादप्राप्तेर्निश्चयस्तदैवंकरणमुचितमित्या-शङ्क्य एवमनुष्ठिते प्रसादस्यावश्यम्भावित्वं श्लेषप्रक्रिययाह। भवत्प्रसादमित्येकं पदम्। भवन्तीति भवन्, स चासौ प्रसादश्चेति तम्। तथा च यो भवन्नवश्यम्भावः प्रसादः स कदाचित् प्रतिबन्धेन पराहतः सन्निह जन्मनि न भवेत् तदा जन्मान्तरे वा स्यादेवेति निश्चयः सूचितः। एवं निश्चयस्य फलत्वं भगवतः कारुणिकत्वेन भवेदित्यभिप्रायेणाम्बुजा-क्षेति सम्बोधयति। अम्भोजवदक्षिणी लोचने इत्यर्थः। एवमाचरितेऽपि यद्येतज्जन्माव्यवहित-जन्मनि प्रसादो न स्यात्, तदानेकजन्मसु प्राणसमर्पणरूपेणानुष्ठानेन त्वत्प्राप्तिसम्पादने प्रसादः स्यादित्याशयेहनाह - शतजन्मभिः स्यादिति। तव करुणाशालित्वेन प्रसादस्याविलम्बेऽपि प्रतिबन्धकीभूतदुरितस्य स्वतोविलयप्रतीक्षया विलम्बोऽस्तीति चेत् प्रतिजन्मनि त्वदनुसरणादिपुण्यवशेन किञ्चित् किञ्चित् क्षणान्निशेषविलये

---

१. छान्दोग्य उपनिषद् ६।५।४, ६।६।५

२. वही ६।५।४, ६।६।५, ६।७।६

३. वियोग शृङ्गार की दस दशाओं में मृत्यु को अन्तिम दशा कहा गया है-
विप्रलम्भे चाभिलाष-चिन्ता-स्मृति-गुणकीर्तनोद्वेग-प्रलापो-न्माद-व्याधि-जडता-निधानि दशावस्थाः भवन्ति।-रसमञ्जरी, पृ० ३२८

शतजन्मान्यतमजन्मनि ततः परं वा जाते सति प्रसादो भविष्यत्येवेत्याकूतं ज्ञापितं भवति। अयमर्थो भगवता बादरायणेनाभिहितः–

यथा यथात्मा परिमृज्यतेऽसौ
मत्पुण्यगाथाश्रवणाभिधानैः ।
तथा तथा पश्यति वस्तु सूक्ष्मं
चक्षुर्यथैवाञ्जनसम्प्रयुक्तम् ।।[१]

इति। तव लीलाविग्रहधारणेन यदा यदाविर्भावो भवेत्, तदा तदा ममापि परिचरणाय सन्निधिः। 'रामत्वे जानकी ह्यासीद्रुक्मिणी कृष्णजन्मनीति' वाक्यावगतो नियत इति गूढाभिसन्धिः। एवं मदाचरणं शुभोदर्कमेव भवेदित्यभिप्रायेण भो अय शुभावह दैवरूप इति। लभेयेत्यत्र लभे अय इति छेदं विधाय सम्बोधयतीत्यर्थः पदद्वयकरणेन बोध्यः। एवं च दृष्ट्वा दृष्ट्वाखिलप्रतिबन्धनिरासकशक्तिमता सर्वेश्वरेण भगवता एतावन्मदीयनिर्बन्धमनपेक्ष्य वाचिकप्राणसमर्पणरूपपुण्येन जन्मान्तरीयपूर्ताद्याराधनेन चाधुनैव प्रसादो विधेयः इति करुणामावेदयतीति बोध्यम्। किञ्च, प्रथमश्लोकोक्तचित्तत्व-दधीनत्वकरणेन, तृतीयश्लोकोक्तदेहसमर्पणेनान्तिमश्लोकोक्तप्राणतदुपलक्षितेन्द्रियसमर्पणेन च सर्वोपाधिविलयस्य जातप्रायत्वादाभासमात्रेणावस्थिततायाः पूर्तादिपुण्यवशेनाखिल-प्रतिबन्धकविरहितायास्त्वदापरोक्ष्यमाशासंत्या मम नित्यानन्दैश्वर्यस्य तव साक्षात्काराभिन्ना-खण्डानन्दरूपेणावस्थिति–**'यमेवैष वृणुते तेन लभ्य'**[२] इति श्रुत्युक्तप्रक्रियया त्वत्कृतवरणमन्तरा न स्यात्। यतो भगवदाप्तिर्भगवदधीनैवेति। अतो मामुद्वहेति वाक्येन तत्कर्तव्यमित्यखण्डवाक्यार्थ उपनिषत्सिद्धान्तानुसारेणोन्नेय इति रुक्मिण्यभिप्रायं विशदीचकार द्विजन्मा भगवते श्रीकृष्णाय रसिकमतानुसारेण वा अखण्डवाक्यार्थं व्यजिज्ञपत्। यदालम्बनः संस्कारः श्रवणाद्युद्दीपनविभावेन चैद्येश्वर्यादेस्तुच्छत्वे ज्ञानारूपानुभावेनौत्कण्ठ्यादिना व्यभिचारिभावेन परितोषितः सन् परमानन्दरसाभिन्नस्थायीभावतामापन्नो लौकिकशृङ्गारादि-रसापेक्षया निरवच्छिन्नचिद्रूपभगवत्स्फूर्तिशाली विगलितवेद्यान्तरोऽलौकिकानन्द-

---

१. श्रीमद्भागवत महापुराण ११।१४।२६

२. कठोपनिषद् २।२२; मुण्डकोपनिषद् ३।२।३

रूपेणानुभूतोऽस्ति। स एवालम्बनरूपः सच्चिदानन्दघनो भगवान् यदि साक्षात्कृतो भवेत्तदानन्दस्यातिमात्रता मनोवचोगोचराखण्डाद्वयानन्दरूपा फलिष्यतीति तेन कृतकृत्यत्वमप्यतिमात्रं भवेदित्येतदर्थं त्वत्सन्निधानमाशासति रुक्मिणीति। उभयविधेऽपि वाक्यार्थे सच्चिदानन्दघनपरब्रह्मरूपश्रीकृष्णावाप्तिः पर्यवस्यति प्रक्रियाभेदेनेत्यलम्।।७।।

(पुष्पिका)

रुक्मिणीयपत्रिकार्थोऽयं यथामति विकासितः।
कृपां कुर्वन्तु विद्वांसो गुणदोषविवेचनैः।।१।।
प्रीयतां रुक्मिणीजानिः सर्वापन्मोचकः क्षणात्।
दीनानुकम्पी सर्वज्ञो दीने मयि निरन्तरम्।।२।।

इति भागवते दशमस्कन्धे रुक्मिणीपत्रिकाविवरणं समाप्त ।।६।।

।। ॐ नमो भगवते वासुदेवाय ।।

□□

।। श्रीरुक्मिणीपत्रिका ।।

(हिन्दी भावानुवाद)

श्रीमान्, जगन्मङ्गल नाम वाले, वसुदेव के पुत्र भगवान् श्रीकृष्ण हमें वाणी प्रदान करें, जिनके चरणों से संलग्न होकर मणिनूपुर आदि ने अलौकिक मुखरता को प्राप्त किया।।१।।

देवी रुक्मिणी ने द्वारकाधीश श्रीकृष्ण के लिए शुभ-पत्रिका प्रेषित की। गुरु के चरणों के प्रसाद से उसका किञ्चिद् अर्थ लिखा जा रहा है।।२।।

राजा भीष्मक की पुत्री रुक्मिणी ने नारद आदि के द्वारा लिये जाने वाले नाम वाले, भगवान् वासुदेव के गुणों को सुनकर उनमें अनुरक्त चित्त वाली, उन्हीं का दिन-रात चिन्तन करती हुई, उस समय क्षणादि अत्यल्प काल को भी सौ युग के समान (भगवान् के वियोग में) अनुभव करती हुई, उन (भगवान्) को न प्राप्त कर काल के विप्रकर्ष को मुग्ध भाव से न पार करती हुई, पिता आदि के द्वारा उसका (रुक्मिणी) अन्यत्र विवाह करने का निश्चय किये जाने के कारण अतिशय धी (बुद्धि, विचार) किया। अपने वृत्तान्त के श्रवण से मेरे भीतर कैसा (भाव उठ रहा है) इसे न जानती हुई, अपने वृत्त को जानकर, अपने भावों से युक्त पत्रिका को (भगवान् श्रीकृष्ण के पास) अतिविश्वस्त ब्राह्मण के द्वारा भेजा।

इसके पश्चात् भगवान् श्रीकृष्ण ने प्रतिहार द्वारा प्रवेश कराये गये लेख-वाहक ब्राह्मण की विधिवत् पूजा करके उनके मुख से ही पत्रिका को सुना। क्योंकि, राजा दूसरों के द्वारा भेजे गये फल-पत्रादि किसी भी सामग्री को सबसे पहले न छुये और पढ़े-यह नीति है। प्रारम्भ में लोक में ब्राह्मण विवाह के समय किये जाने वाले सप्तपदी में वधू एवं वर की अपरावृत्ति का निश्चय करता है, उसी प्रकार यहाँ भी है।

'पद्यं शब्दे च वाक्ये च व्यवसायापदेशयो' इस नियम से सात वाक्यों के निबन्धन से जो सप्तपदी के (सात वचनों एवं सात फेरों के) पर्याय भूत हैं, हम दोनों के (कृष्ण एवं रुक्मिणी) परस्पर अनुराग की अपरावृत्ति परक निश्चय को रुक्मिणी सूचित करती है। सात पद्यों की रचना के अभिप्राय के विशदीकरण के द्वारा इसे 'श्रुत्वेति' कहा गया है। सात वाक्यों के वसन्ततिलका छन्द के निबन्धन के बहाने वाक्य के सुनने के समय ही पूर्ण रस का आर्विभाव हो जाय, यह भी ध्वनि निकलती है। इस प्रकार शब्द-सन्दर्भ एवं रचना के अभिप्राय को कहकर उसके भीतर निहित अर्थ का निबन्धन, कौशल एवं निपुणता की उपपत्ति की जा रही है।

'अङ्गेति' सम्बोधन बोधक अव्यय (अङ्ग) के द्वारा सम्बोध्य का (अर्थात् भगवान् श्रीकृष्ण का) अव्ययत्व (कभी भी व्यय न होने वाला) ज्ञात होता है। 'स्युः प्याट्याऽङ्ग हे है भो' ऐसा सम्बोधन बोधक शब्दों का अनुशासन प्राप्त होता है। 'अङ्ग अच्युत' अर्थात् हे अच्युत! अपने आश्रितकी च्युति जहाँ कभी भी न हो इस व्युत्पत्ति के द्वारा भाई आदि के परित्याग होने पर, आपकी आश्रितता प्राप्त होने पर मेरी च्युति आपसे कभी भी न हो, इस शंका से भगवान को उनके बिरुद (अच्युत) के नाम से वह रुक्मिणी सम्बोधित करती है। 'मेरा चित्त अपत्रप (लज्जा रहित होकर) तुममें प्रविष्ट हो' ऐसी योजना है। दूर हो गयी है त्रपा अर्थात् लज्जा सङ्कोच जिससे। निःसङ्कोच होने से प्रशस्त होता है, ऐसा तात्पर्य है। तुममें जाता है, प्रवेश करता है, लीन होता है, इसका अर्थ है (मेरा चित्त) तुममें अनुरक्त है। अतः चित्त की इच्छानुसार अनुरक्ति अन्यत्र भी दिखाई पड़ती है। ऐसा नायिका में अनुरक्त नायक का वाक्य है-'लीन के समान, प्रतिबिम्बित के समान, लिखित (चित्रित) के समान, उत्कीर्ण के समान, सोये हुए के समान, वज्रलेप घटित (सीमेण्ट आदि से युक्त भित्ति) के समान (दृढ़) तथा भीतर की ओर खुदे गड्ढे के समान वह हमारे चित्त में इस प्रकार धँसी है जैसे यह संसार पञ्च-बाणों बिद्ध है, घने तन्तुजाल के द्वारा सिले हुए के समान 'लीनाप्रिय'। इस प्रकार अनुराग के वशीभूत चित्त एकमात्र तुम्हारे विषय में लीन रहता है। अर्थात् तुम्हारे चिन्तन में डूबा रहता है। पितादि के वश में होने से परतन्त्र कन्याओं का उनके (पितादि के) अनुकूल वर में एकमात्र अनुराग उत्तम है,

उससे अन्य (वर) में स्वतन्त्रतापूर्वक अनुराग शालीनता का बाधक है, इस आशङ्का से कहा–तुम्हारे गुण कर्णछिद्रों में प्रविष्ट होकर श्रोताओं के ताप हरने वाले हैं। हे भुवन सुन्दर अर्थात् त्रिलोकीसुन्दर, तुम्हारे सौन्दर्यवार्ता से ही त्रैलोक्य–सौभाग्य है, आपके इस रूप को देखकर जो गो, पक्षी, वृक्ष एवं पशु पुलकित होते हैं–इस प्रकार के वचनों के अनुसार, (भगवान् श्रीकृष्ण के गुणादि) सुनने वाले पशु आदि के भी मन को हरने में समर्थ हैं तो उन्हें देखने वाले लोगों की क्या बात। दूसरे के मन को हरण करने की विलक्षण शक्ति भगवान् श्रीकृष्ण के सौन्दर्य की है, यही भाव है। कान के द्वारा श्रोताओं के अन्तःकरण में प्रवेश कर आपके गुण ताप अर्थात् उद्वेग का हरण करते हैं। आपके शौर्य, दीनों पर अनुकम्पा आदि गुणों को सुनकर–यह अर्थ है। कान के द्वारा जो (भगवान् श्री कृष्ण के) सौन्दर्य रस से परिप्लावित चित्त वाले व्यक्ति हैं, उनकी चारों ओर से कष्ट–निवारण के साथ रससिक्तता भी होती है।

श्लोकार्थ–हे भुवनसुन्दर तुम्हारे गुणों को सुनकर, श्रोताओं के कर्णच्छिद्रों में प्रवेश कर (तुम्हारे गुण) शरीर के ताप को दूर करते हैं। तुम्हारे रूप को देखकर दृष्टि युक्त लोगों की दृष्टि समग्र लाभ को प्राप्त कर लेती है, अर्थात् मनुष्य के नेत्र तुम्हारे दर्शन से सफल एवं सार्थक हो जाते हैं। हे अच्युत, मेरा चित्त बिना लज्जा–संकोच के तुममें प्रविष्ट है।।१।।

पुनः युवतियों का अर्थात् कन्याओं की क्या बात – यह भाव है। लोक में भी अलौकिक वार्ता को सुनने से उसी समय उद्वेग का निवारण हो जाता है, यह व्यवहार से अनुसन्धान योग्य है। 'हरत' इस अन्त–विशेषण से कब मुझे भगवान् की प्राप्ति होगी – इस उद्वेग के दाहक होने के कारण उसका निवारण ईश्वर की सुलभता से होगी, ऐसा प्रतीत होता है। इस प्रकार अति चतुर भगवान् ने अपने गुण के द्वारा दूसरे के मन में प्रवेश करने का प्रकार (तरीका) अपनाया। उस समय जब आपके गुण मेरे हृदय को ईश्वर–परक बनाकर कृतकृत्य हो जाने के कारण पराङ्मुख हो गये तथा स्वयं प्रकाशमय अन्य स्थान पर चिरकालावस्था आदि विविध औचित्य के कारण लौट गये, तब मेरे चित्त के द्वारा, जो एक मात्र आपके वश में हैं, उसका अपने स्थान

